# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – १-२-२००९ | अङ्काः–१००

पूर्वाह्णे – १०-०० तः १-०० पर्यन्तम् | समयः–घण्टात्रयम्

**1 पञ्चानाम् एकवाक्येन उत्तरं लिखत ।** 5

१. कस्य औषधं नास्ति ?
२. कः कं उपहन्ति ?
३. पवनपदवीमारूढं काः प्रेक्षिष्यन्ते ?
४. के कान् उपभुज्य अमर्त्याः जाताः ?
५. अर्थदर्शनं कः कुरुते ?
६. कस्य किं सौभाग्यविलोपि न जातम् ?
७. कः नारीणां परमो धर्मः ?
८. दशकुमारचरितम् केन रचितम् ?

**2 पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

१. महात्मनां किं प्रकृतिसिद्धम् ?
२. मधुमक्षिकाणां व्यवहारं वर्णयत ।
३. पौरान् प्रति सक्रोधं बकः किं किं चिन्तयति ?
४. विप्रयोगे कः रुणद्धि ?
५. भीमः केषां मध्यमः ?
६. कः रिपुः उन्मूलयितुं सुकरः ?
७. धर्मराजस्य दृष्ट्या बान्धवाः के ?
८. राजवाहनः विन्ध्याटवीमध्ये कीदृशं पुरुषं ददर्श ?

**3 पञ्चषैः वाक्यैः द्वयोः उत्तरं लिखत ।** 8

१. ''दैवं पृष्ठतः कृत्वा पौरुषमाश्रयन्ते पुरुषर्षभाः'' इति वाक्यम् अर्जुनेन कथं समर्थितम् ?
२. पाण्डवाः कीदृशाः इति ब्राह्मणः वदति ?



पश्चादनुवर्तते

३. सौख्यत्रयेणापि कुन्ती कथं वञ्चिता आसीत् ?

४. अब्धेः स्वभावः कीदृशः ? विवृणुत ।

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

१. अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षणजः अनलः ।

२. आत्मनः व्रतत्यागेनापि आत्मीयस्य व्रतसत्यापनम् ।

३. कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।

४. एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।

५. अविवेकः परमापदां पदम् ।

**5 द्वयोः भावं विशदयत ।** 8

१. भग्नं भित्तिभिरालयैर्निपतितं स्रोतोभिराप्लावितं
विध्वस्तं पशुभिश्च संघश इति क्रोशन्ति वृष्टे त्वया ।
त्वय्युद्गृह्णाति वारि वारिद जना नश्यन्त्यवश्यं क्षणा -
त्कीर्तिं चिन्तय दुर्लभां न गणय क्षुद्रान् गुणान् मादृशाम् ।।१।।

२. अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ।।

३. लब्ध्वा सुदुर्लभतरं नरजन्म जन्तुः
तत्रापि पौरुषमतः सदसद्विवेकम् ।
संप्राप्य चैहिकसुखभिरतो यदि स्यात्
धिक् तस्य जन्म कुमतेः पुरुषाधमस्य ।।

**6 श्लोकद्वयं पूर्णं लिखत ।** 4

१. प्रदानं ............................................ व्रतमिदम्

२. मातेव ........................................... विद्या ।।

**7 एकस्य कवेः देश-काल-ग्रन्थान् अधिकृत्य लिखत ।** 4

१) विद्वान् एन्. रङ्गनाथ शर्मा २) दण्डी ३) कालिदासः

8 **एकस्य लघुटिप्पणीं लिखत ।** 4

१) मातङ्गः २) भीष्मः

9 **चत्वारि पदानि वाक्ये योजयत ।** 4

१) सम्प्रति २) रोचते ३) निःशङ्कम्
४) अभिहितः ५) क्षीयते ६) ददर्श

10 **चतुर्णां पर्यायपदानि लिखत ।** 4

१) सरित्पतिः २) सुधाकरः ३) द्विषः
४) तिमिरः ५) विद्युत् ६) रथः

11 **चतुर्णां रूपाणि विवेचयत ।** 4

१) यतिष्ये २) अटन्ती ३) गिरम्
४) हृदयग्राहिणि ५) वर्त्मनि ६) प्रयान्तः

12 **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

१) गदापाणिः २) गिरिवनजलपुष्पैः ३) समरशौण्डीरः
४) तालध्वजः ५) कुबुद्धिः ६) सुधामुचः

13 **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

१) अणुरपि २) तस्माद्गच्छ ३. ह्येषः
४) सहसागत्य ५) भगवन्नभिवादये ६) वाङ्मयः

14 **द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

१) तृण्ढि २) अगमत् ३) धर्षयेत्
३. प्रपत्स्ये ४) ददर्श ६) निगृह्णीमहे

15 **द्वयोः व्याकरणविशेषं लिखत ।** 4

१) नगाधिराजः २) अवलम्ब्य अलम् ३) चरिष्णुः
४) आत्मनीनम् ५) मा भूः ६) गाङ्गेयः



पश्चादनुवर्तते

**16** **समासमेकं सलक्षणं विशदयत ।** 4

१) बहुव्रीहिः २) द्वन्द्वः

**17** **प्रयोग परिवर्तनं कुरुत ।** 3

१) अस्माभिः स्थास्यते २) अहम् अलज्जे

३) त्वया वयं पुनर्द्रष्टव्याः ।

**18** **इतरवचनरूपाणि लिखत ।** 3

मघोनः ................ .................... ।

................ ताभ्याम् ............... ।

............ ............... अस्माकम् ।

**19** **रिक्तस्थानं पूरयत ।** 4

१) ननु पापाः ................. । २) विपदन्ता ................. ।

३) स्थितःपृथिव्याः ............. । ४) यत्ने कृते .................।

५) निर्वेद प्रत्यर्थिनी ................ ।

**20** **चतुर्थं पदं लिखत ।** 4

१) दशकुमारचरितम् ; दण्डी ; मध्यम व्यायोगः ; ..............

२) पुण्डरीकाक्षः ; बहुव्रीहिः ; मातापितरौ ; .............

३) अल्पम् ; अनल्पम् ; आदरः ; ..............

४) वार्ष्णेयः ; कृष्णः ; वैकर्तनः ;...............

★★★★★

# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – १-२-२००९ | अङ्काः–५०
अपराह्णे – १-३० तः ३-०० पर्यन्तम् | समयः–सार्धैकहोरा

1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत। 6

१) प्रदूषणम् २) संस्कृतभाषयाः माहात्म्यम् ३) गणेशोत्सवः

2 (अ) पञ्चमी विभक्तिः कदा उपयुज्यते । सोदाहरणं विशदयत । 6

(आ) प्रयोगाः कति ? नामानि लिखत । प्रयोगमेकं सोदाहरणं विवृणुत

3 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत। 6

१. अलप्स्यत २. वर्धिषीष्ट
३. चकार ४. जीयात्

4 अ) वसन्ततिलकायाः लक्षणं सोदाहरणं विवृणत । 6

आ) निष्कम्पवृक्षं निभृतद्विरेफं - अत्रत्यं वृत्तं सलक्षणं सप्रस्तारं च निरूपयत।

5 द्वयोः वाक्ययोः अलङ्कारं सलक्षणं स्पष्टयत । 4

१. कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवम् ।
२. सर्वदोमाधवः पायात् स यो गङ्गामदीधरत् ।
३. वाणी तव सुधा विद्वन् ।
४. स्थितः पृथिव्या इव मानदण्डः ।

6 प्रयोगपरिवर्तनं कुरुत (त्रयाणामेव) 3

१. यदा सूर्येण प्रकाश्यते तदा नश्यते तमसा ।
२. त्वया वयं पुनः द्रष्टव्याः ।
२. सः शालां गच्छति ।
४. श्रीरामेण प्रजाः धर्मतत्पराः चक्रिरे ।



पश्चादनुवर्तते

7 **वाक्यदोषं परिहरत । (चतुर्णामेव)** 4

१. सिंहः वने अधितिष्ठति ।　　२. हस्ते कुणिः ।

३. रामस्य फलानि रोचन्ते ।　　४. तस्य विना भोजनं कर्तुं न इच्छामि ।

५. गृहस्य परितः उपवनं वर्तते ।

8 **अन्यलिङ्गरूपं लिखत (त्रयाणाम्)** 3

१) देवः　　२) महिषी　　३) स्वसा　　४) पालकः

9 **यथानिर्देशं लिखत । (द्वयोः)** 2

१) वाक् शब्दस्य तृतीया विभक्ति रूपाणि ।

२) कृ धातोः विधिलिङ् मध्यमपुरुषरूपाणि ।

३) वाक्यरचनोपयुक्तचिह्नद्वयं लिखत ।

10 **मातृभाषाया अनुवदत ।** 5

एकदा कोऽपि जम्बुकः आहारार्थं वने भ्रमन्नासीत् । तदा सः पक्वद्राक्षाफलैः पूर्णां द्राक्षालताम् अपश्यत् । ''अद्य मम द्राक्षाफलानां स्वादु भोजनम्' इति मनसि चिन्तयित्वा फलानि प्राप्तुं उपरि उदपतत्'' । किन्तु सः सफलः न बभूव। तेन बहुवारं उत्पत्य फलानि प्राप्तुं यत्नः कृतः तथापि तानि न प्राप्तवान् । सः कुपित्वा द्राक्षाफलानि आम्लानि इति दूषयित्वा अन्यत्र अगच्छत् ।

11 **संस्कृतभाषया अनुवदत ।** 5

There was a miserly Brahmin living in a village. He earned lot of wealth by working hard. He wore old clothes. He ate very little. He did not use his wealth and stored it. Once some thieves stole all his money. He became mad.

ಒಂದು ಗ್ರಾಮದಲ್ಲಿ ದೀನನಾದ ಒಬ್ಬ ಬ್ರಾಹ್ಮಣನು ವಾಸಿಸುತ್ತಿದ್ದನು. ಅವನು ಕಷ್ಟಪಟ್ಟು ದುಡಿದು ಬಹಳ ಹಣವನ್ನು ಸಂಪಾದಿಸಿದನು. ಅವನು ಹಳೆಯ ಬಟ್ಟೆಗಳನ್ನು ಧರಿಸುತ್ತಿದ್ದನು. ಅವನು ಬಹಳ ಕಡಿಮೆ ಊಟ ಮಾಡುತ್ತಿದ್ದನು. ಅವನು ಅವನ ಸಂಪತ್ತನ್ನು ಬಳಸದೇ ಕೂಡಿಟ್ಟನು. ಒಮ್ಮೆ ಕೆಲವು ಕಳ್ಳರು ಅವನ ಎಲ್ಲಾ ಸಂಪತ್ತನ್ನು ದೋಚಿದರು. ಅದರಿಂದ ಅವನು ಹುಚ್ಚನಾದನು.

★ ★ ★ ★ ★